नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **8**

# P-95-Sanskritam-II (Supp.)

## संस्कृतम्

## (द्वितीय – प्रश्नपत्रम्)

## प्रवेशिका पूरक परीक्षा, 2020

**समय : 3¼ होराः**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

(गद्य–भागः)

अतिलघूत्तरात्मकाः प्रश्नाः

1. पञ्चतन्त्रे प्रथमतन्त्रस्य नाम किम् ? 1

2. हिरण्यक: कस्य ऊष्मणा प्रकूर्दते स्म ? 1

3. स्वर्णहंस–कथायां तडागस्य नाम किम् ? 1

4. प्राणत्यागेऽपि उपस्थिते किं नैव कर्त्तव्यम् ? 1

5. विमले जले क: क्रीडति ? 1

लघूत्तरात्मकाः प्रश्नाः

6. कच्छप: हंसौ च कथं चिन्तितवन्तः ? 2

7. स्वर्णहंसा: बृहत्पक्षिणं किम् उक्तवन्त: ? 2

8. चाणक्येन कया असिपाणय: नन्दा: हता: ? 2

9. निम्नलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या : **1 + 4 = 5**

(क) "अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तस्य नातिदूरे मठायतनं भगवत: श्रीमहादेवस्य । तत्र च ताम्रचूडो नाम परिव्राजक: प्रतिवसति स्म । स च नगरे भिक्षाटनं कृत्वा प्राणयात्रां समाचरति । भिक्षाशेषञ्च तत्रैव भिक्षापात्रे निधाय, तद् भिक्षापात्रं नागदन्तेऽवलम्ब्य, पश्चाद्रात्रौ स्वपिति ।"

(ख) तत्र ये पौरास्ते तं तथा नीयमानं विलोक्य सविस्मयमिदमूचुः – 'अहो ! चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत । पश्यत । '

अथ तेषां कोलाहलमाकर्ण्य, कम्बुग्रीव आह – 'भो ! किमेष: कोलाहल: ? इति वक्तुमना अर्धोक्ते पतित:, पौरै:, खण्डश: कृतश्च ।'

10. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या कार्या : **1 + 4 = 5**

(क) अथाऽन्यस्मिन्नहनि तेन किमपि नासादितम् । वने भ्रमतोऽपि रविरस्तं गत: । अथ तेन स्वगृहमागच्छता शृगालशिशु: प्राप्त: । सिंहश्च 'बालकोऽयम्' इति अवधार्य दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान् । तत: सिंह्या अभिहितम् – 'भो: कान्त ! त्वया आनीतं किञ्चित् अस्माकं भोजनम् ।'

(ख) एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गत: । धीवरैरपि प्रभाते आगत्य जघन्यमध्यमोत्तमजलचरा, मत्स्य-कूर्म-मण्डूक-कर्कटादयो गृहीता: । तावपि शतबुद्धि-सहस्रबुद्धी सभार्यौ पलायमानौ, चिरमात्मानं गतिविशेषविज्ञानै: कुटिलचारेण रक्षन्तौ, जाले पतितौ व्यापादितौ च ।

11. एकस्याः कथायाः सारांशः संस्कृते लिखत । **4**

(क) स्वर्णहंस – स्वर्णपक्षिराजकथा

(ख) काष्ठभ्रष्टकच्छपकथा

**(पद्य–भागः)**

**अतिलघूत्तरात्मकाः प्रश्नाः**

12. अर्जुनस्य अधिकार: कुत्र भवेत् ? **1**

13. मृदङ्गो मुखलेपेन किम् करोति ? **1**

14. कैकेयी नृपं प्रथमवरं किम् अयाचत ? **1**

15. विवेकानन्दस्य गुरो: नाम किम् ? **1**

16. वरतन्तु: कस्य शिष्य: आसीत् ? **1**

**लघूत्तरात्मकाः प्रश्नाः**

17. कीदृशं तपः मानसम् उच्यते ? **2**

18. नीतिशतकस्य लेखक: क: अस्ति ? अस्य अन्या: रचना: का: सन्ति ? **1 + 1 = 2**

19. 'रामो द्विर्नाभिभाषते' इति पाठ: कुत: स्वीकृत: ? अस्य रचनाकार: क: अस्ति ? **1 + 1 = 2**

20. विवेकानन्दस्य शब्दे शब्दे पादे पादे च का आसीत् ? **2**

21. रघुः कस्मिन् यज्ञे केभ्यः किम् अयच्छत् ? **2**

22. अधोलिखितेषु **द्वयोः** पद्ययोः सप्रसङ्गं व्याख्या कार्या : **1 + 2 × 2 = 6**

(क) वासांसि जीर्णानि यथा विहाय,

नवानि गृह्णाति नरोऽपराणि ।

तथा शरीराणि विहाय जीर्णा –

न्यन्यानि संयाति नवानि देही ।।

(ख) श्रोत्रं श्रुतेनैव न कुण्डलेन,

दानेन पाणिर्न तु कङ्कणेन ।

विभाति कायः करुणाकुलानां,

परोपकारेण न चन्दनेन ।।

(ग) अपि प्रसन्नेन महर्षिणा त्वं,

सम्यग्विनीयानुमतो गृहाय ।

कालो ह्ययं सङ्क्रमितुं द्वितीयं,

सर्वोपकारक्षममाश्रमं ते ।।

23. अधोलिखितयोः श्लोकयोः **एकस्य** सप्रसङ्गभावार्थः लिखत । **1 + 3 = 4**

(क) कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।

मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ।।

(ख) भरतः कोसलपतेः प्रशास्तु वसुधामिमाम् ।

नानारत्नसमाकीर्णां सवाजिरथसङ्कुलाम् ।।

**छन्द–अलङ्कार–कोष–प्रश्नाः**

24. अधोलिखितेषु छन्दःसु **द्वयोः** लक्षणोदाहरणे लिखत : **1 + 1½ × 2 = 5**

(क) हरिणी

(ख) मन्दाक्रान्ता

(ग) मालिनी

25. **द्वयोः** अलंङ्कारयोः लक्षणोदाहरणे लिखत – **1 + 1½ × 2 = 5**

(क) यमकम्

(ख) रूपकम्

(ग) विशेषोक्तिः

**शब्दरूप-धातुरूप-रचना-प्रश्नाः**

26. अधोलिखित – कोष – प्रश्नाः समाधेयाः **1 + 4 = 5**

(क) अमरकोषस्य कति नामानि प्रसिद्धानि सन्ति ?

(ख) प्रत्येकस्य शब्दस्य पर्यायद्वयं लिखत –

बुद्धः, शिवः, नन्दी, लक्ष्मी

27. निर्देशानुसारं शब्दरूपाणि लिखत। **1 + 1 + 1 + 1 = 4**

(क) तत् शब्दस्य, पुल्लिङ्ग – तृतीया – एकवचनम्

(ख) बालक-शब्दस्य, सप्तमी – द्विवचनम्

(ग) जगत्-शब्दस्य, प्रथमा – बहुवचनम्

(घ) लता-शब्दस्य, षष्ठी – बहुवचनम्

28. निर्देशानुसारं धातुरूपाणि लिखत। **1 + 1 + 1 + 1 = 4**

(क) वद् धातु – लट्लकार – मध्यमपुरुष – बहुवचनम्

(ख) अस् धातु – लोट्लकार – प्रथमपुरुष – बहुवचनम्

(ग) जि धातु – लृट्लकार – उत्तमपुरुष – एकवचनम्

(घ) लभ् धातु – लङ्लकार – प्रथमपुरुष – द्विवचनम्

29. अधोलिखितविषयेषु कमपि एकं स्वीकृत्य शतपदेषु निबन्धं लिखत : **4**

(क) स्वच्छता

(ख) माघः

(ग) संस्कृते विज्ञानम्

30. भवान् सुरेशः, राजकीय-प्रवेशिका – संस्कृत – विद्यालय – श्रीरामनगरस्य छात्रः, ज्येष्ठ-भ्रातुः विवाहाय दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखतु । **3**

**अथवा**

भवतः ग्रामे क्रीड़ाक्षेत्रस्य विकासाय सरपंच-महोदयाय पत्रं लिखतु ।